# Amlanapankajamalabandha Panchakam

# अम्लानपङ्कजमालाबन्धपञ्चकम्

## Document Information

Text title : Amlanapankajamalabandha Panchakam

File name : amlAnapankajamAlAbandhapanchakam.itx

Category : vishhnu, vishnu, moropanta, panchaka

Location : doc_vishhnu

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2023

*sanskritdocuments.org*

# अम्लानपङ्कजमालाबन्धपञ्चकम्

(स्रग्धरावृत्तम् *)
धाता दाताविता त्वं गृह इह गहने लोकशोकघ्नकर्मा
दीनानां नाथ! नान्यो (१)हृतनतपतनस्त्वां विना विश्ववित्तः(२) ।
(३)मायेगा ये न ये स्वामनु ननु मनुजास्तैः कृतं कृत्मकृत्यं
वाविद्याविक्तविघ्नैर्वत! हृतमतयो राम! वा मद्यमत्ताः ॥ १॥

ज्ञानात्मानादिनाथः (४)स्वजनजयजनुः पावनो वर्ण्यवर्यः
सेवा ते वासवार्हा किमुत मुनिमुदे राम! भूमन् ! नमस्ते ।
(५)कालं कालं बलं त्वद्भुजमज! । न जहातीश! भो शर्वशक्ते!
त्वं हंहो हन्त(६) ! हन्ता हरिररिहरिणो रावणोऽवद्यवर्त्मा ॥ २॥

वीरो धीरो गुरो ! त्वं शुचि(७)रुचिरुचितं सेवितुं विज्ञवित्तं
मोदाढ्यो दासदायः(८) खलबलविलयो भावनावत्सु(९) वश्यः ।
शान्तोऽनन्तोऽतितोषात्सममरमणे! । भासि पासि स्वसिद्धः
साधुर्बन्धुर्विधुर्भोः कुरु गुरुकरुणां सेवकेऽव स्ववत्सम् ॥ ३॥

माने दानेऽवनेऽलं त्वमसि महिमनोमोहनो हर्षहर्म्यं
कीशादीशातिशातं सुरनरवर! ते ह्यादरादत्र दत्तम् ।
स्वाचारं चापचारुव्रतमत इतरे त्वां न केऽनर्घ्यनम्राः
सेवां ह्येवाङ्ग वाञ्छन्कपिरपि स पिनाकी सदा सख्यसक्तः ॥ ४॥

स्वौजा(१०) राजा प्रजानां त्वमतिमहिमहःपालको लब्धलक्षो
भोगी त्यागी भगी(११) सोत्सवनवसवको मन्दकन्दर्पदर्पः ।
आशानाशान्न शाठ्यं कृतमुत नतरां घात एतच्च तज्ज्ञै-
र्ज्ञातं तातं हितं त्वां जगुरगुरुगुरुं(१२) ज्ञानिनो नित्यनिष्ठाः ॥ ५॥

इति श्रीरामनन्दनमयूरेश्वरकृतं अम्लानपङ्कजमालाबन्धपञ्चकं सम्पूर्णम् ।

टिप्पणि

* स्रग्धरावृत्तपादे सर्वेऽपि यतिविभागाः समानाः सप्ताक्षराश्च । अतश्चित्रकाव्येष्वन्यतमस्याम्लानपङ्कजमाला तदेवातावोपकरोति । अस्मिन् हि द्वादश यतिविभागाः प्रतिश्लोकं तावन्ति पङ्कजानीति कल्प्यते । उद्धाररातिस्त्वियम् । प्रथमस्यां पङ्क्तावक्षरमेकं द्वितीयस्यां त्रीण्यक्षराणि तृतीयस्यां च पुनरक्षरमेकमिति क्रमेण लिखिते एतान्येव पञ्चाक्षराणि सप्त सम्पद्यन्ते । प्रथमपङ्क्तिस्थितं प्रथममक्षरं, द्वितीयपङ्क्तिस्थितं मध्यमं द्वितीयमक्षरं, द्वितीयपङ्क्तिस्थितं प्रथम तृतीयं, मध्यमं चतुर्थ, तृतीयं पञ्चमं पुनर्मध्यमं षष्ठं, तृतीयपङ्क्तिस्थं च सप्तममिति वाचनक्रमस्तु इह योजितादुद्धारादर्शपत्रादवगम्येत ।

१। हृतं नतानां भक्तानां पतनं नाशो निरयगमनं वा येन सः ।

२। विश्वमेव वित्तं धनं यस्य तादृशः ।

३। ये मायेशाः मायाधीनाः, ये च त्वदनुसरणेऽनुत्कण्ठाः तेषां नान्यत्किञ्चित्कर्तव्यं विद्यते । ते हि अविद्यैव वित्तं तदेव विनास्तैर्दूषितमतयो भवन्ति वा मद्यमत्ता वा भवन्तीति कथञ्चिद्योजनीयम् ।

४। स्वजनानां भक्तानां जयस्याभ्युदयस्य जनुः प्रभवः ।

५। कालं कालं सर्वदा बलं त्वद्भुजं न जहातीत्यन्वयः ।

६। हंहो इत्याश्चर्यार्थकमव्ययम् । हन्ता हरिः मारकः सिंहः, निन्धकर्मा रावणस्तु अरिहरिणः ।

७। शुद्धतेजाः ।

८। दासस्य दायः पित्राद्यागतं धनम् ।

९। भक्तिमत्सु ।

१०। स्वयम्प्रकाशः ।

११। सिद्धिसम्पन्नः ।

१२। अविद्यमानः गुरुः श्रेष्ठः यस्य सः अगुरुः सर्वश्रेष्ठो गुरुरित्यर्थः ।

Proofread by Rajesh Thyagarajan

*Amlanapankajamalabandha Panchakam*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*